# ॥श्रीगुरुवातपुरीश अष्टोत्तरशतनामस्तोत्रम्॥

(Composed by Brahmasri Sengalipuram Anantharama Dikshitar)

The following sloka should be recited first before the Ashtottharastotra.

पीताम्बरं करविराजितशङ्खचक्र–
कौमोदकीसरसिजं करुणासमुद्रम्।
राधासहायमतिसुन्दरमन्दहासं
वातालयेशमनिशं हृदि भावयामि॥

कृष्णो वातपुराधीशः भक्तकल्पद्रुमः प्रभुः।
रोगहन्ता परन्धामा कलौ सर्वसुखप्रदः॥१
वातरोगहरो विष्णुः उद्धवादिप्रपूजितः।
भक्तमानससंविष्टः भक्तकामप्रपूरकः॥२
लोकविख्यातचारित्रः शङ्कराचार्यपूजितः।
पाण्ड्येशविषहन्ता च पाण्ड्यराजकृतालयः॥३
नारायणकविप्रोक्तस्तोत्रसन्तुष्टमानसः।
नारायणसरस्तीरवासी नारदपूजितः॥४
विप्रनित्यान्नदाता च विविधाकृतिशोभितः।
तैलाभिषेकसन्तुष्टः सिक्ततैलार्तिहारकः॥५
कौपीनदरुजाहन्ता पीताम्बरधरोऽव्ययः।
क्षीराभिषेकात्सौभाग्यदाता कलियुगप्रभुः॥६
निर्माल्यदर्शनात्भक्तचित्तचिन्तानिवारकः।
देवकीवसुदेवात्तपुण्यपुञ्जोऽघनाशकः॥७
पुष्टिदः कीर्तिदो नित्यकल्याणततिदायकः।
मन्दारमालासंवीतः मुक्तादामविभूषितः॥८
पद्महस्तश्चक्रधारी गदाशङ्खमनोहरः।
गदापहन्ता गाङ्गेयमोक्षदाता सदोत्सवः॥९
गानविद्याप्रदाता च वेणुनादविशारदः।

भक्तान्नदानसन्तुष्टः वैकुण्ठीकृतकेरळः॥१०
तुलाभारसमायातजनसर्वार्थदायकः।
पद्ममाली पद्मनाभः पद्मनेत्रः श्रियःपतिः॥११
पादनिस्सृतगाङ्गोदः पुण्यशालिप्रपूजितः।
तुळसीदामसन्तुष्टः विल्वमङ्गळपूजितः॥१२
पून्तानविप्रसन्दृष्टदिव्यमङ्गळविग्रहः।
पावनः परमो धाता पुत्रपौत्रप्रदायकः॥१३
महारोगहरो वैद्यनाथो वेदविदर्चितः।
धन्वन्तरिर्धर्मरूपो धनधान्यसुखप्रदः॥१४
आरोग्यदाता विश्वेशः विधिरुद्रादिसेवितः।
वेदान्तवेद्यो वागीशः सम्यग्वाक्छक्तिदायकः॥१५
मन्त्रमूर्तिर्वेदमूर्तिः तेजोमूर्तिः स्तुतिप्रियः।
पूर्वपुण्यवदाराध्यः महालाभकरो महान्॥१६
देवकीवसुदेवादिपूजितो राधिकापतिः।
श्रीरुक्मिणीसत्यभामासंलालितपदाम्बुजः॥१७
कन्याषोडशसाहस्रकण्ठमाङ्गल्यसूत्रदः।
अन्नप्राशनसम्प्राप्तबहुबालसुखप्रदः॥१८
गुरुवायुसुसंक्लृप्तसत्प्रतिष्ठः सुरार्चितः।
पायसान्नप्रियो नित्यंगजराशिसमुज्ज्वलः॥१९
पुराणरत्नपठनश्रवणानन्दपूरितः।
माङ्गल्यदाननिरतः दक्षिणद्वारकापतिः॥२०
दीपायुतोत्थसज्ज्वालाप्रकाशितनिजालयः।
पद्ममालाधरः श्रीमान् पद्मनाभोऽखिलार्थदः॥२१
आयुर्दाता मृत्युहर्ता रोगनाशनदीक्षितः।
नवनीतप्रियो नन्दनन्दनो रासनायकः॥२२
यशोदापुण्यसञ्जातः गोपिकाहृदयस्थितः।
भक्तार्तिघ्नो भव्यफलः भूतानुग्रहतत्परः।
दीक्षितानन्तरामोक्तनामसुप्रीतमानसः॥२३

गुरुवातपुरीशस्य नाम्नामष्टोत्तरं शतम्।
दीक्षितानन्तरामेण भक्त्या स्तोत्रं कृतं महत्॥२४

श्रद्धायुक्तः पठेन्नित्यं स्मरन् वातपुराधिपम्।
तस्य देवो वासुदेवः सर्वार्थफलदो भवेत्॥२५
इति श्रीगुरुवातपुरीशाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥